"अग्नौ सुवर्णमक्षीणमिति" या० उक्तेस्तस्य वह्नौ बहुतापनेऽपि अक्षीणत्वात्तथात्वम् अतएव तस्य तैजसत्वं "स्वर्णं तैजसमत्यन्तानलसन्तापेऽपि अनाश्यत्वादित्यनुमानेन" सि०मु०साधितम्। एतदभिप्रायेणैव "अमृतं वै हिरण्यमित्युक्तम्" शत०ब्रा०। ११भक्षणीयद्रव्यमात्रे, तस्याह्लवत्तथात्वम् १२स्वादुद्रव्ये अमृततुल्यस्वादवत्त्वात्। १३ तत्साधने द्रव्ये त्रि० "आदित्योवै देवमधु" इत्यादि मधुविद्यायाम् 'ता एवास्यामृतामधुनाड्यः' छा०उ०पञ्चकृत्वः पाठः। १४हृद्ये अमृतवदाह्लादकत्वात् तथात्वम् १५ विषे १६ वत्सनाभे विषे तयोः वैद्योक्तदिशा शोधने अमरणहेतुत्वात्तथा। अतएव 'विषमप्यमृतं क्वचिद्भवेदिति" रघुः १७मोक्षे "विद्ययामृतमश्नुते" इति श्रुतिः क्षयशून्यत्वात्तथा 'अमृतस्यैष सेतुरिति" श्रुतिः "स म्रियै चामृताय च" अमरः। १८ अमृततुल्ये आनन्दकरत्वात्तथा। "अमृतं बालभाषितमिति" हितो०। "आप्यायितोऽसौ वचनामृतेन उद्धृतः"। अमृतमस्त्यस्य स्वामित्वेन भक्षकत्वेन वा अर्श०अच्। १९ धन्वन्तरौ सहि समुद्रमथनसमये अमृतं बिभ्रदुत्थितः इति पुराणे प्रसिद्धम्। २० देवे तद्भक्षत्वेन तथात्वम्। देवानाञ्चामृतदर्शनेनैव तृप्तत्वम् 'न वै देवा अश्नन्ति पिबन्ति एतदेवामृतं दृष्ट्वा तृप्यन्तीति" छा०उ०उक्तेः "रथेनामृतं मर्त्यञ्च" य०३३,४० अमृतं देवादिकमिति" वे०दी०। न म्रियते स्म कर्त्तरि क्त। २१वाराहीकन्दे' तस्य बहुच्छेदनेऽपि पुनःप्ररूढ़त्वात्तथा २२ वनमुद्गे च तस्य ओषधितया फलपाकान्तत्वेऽपि छिन्नप्ररूढ़त्वात्तथात्वम्। २३ गुडूच्याम्। २४ इन्द्रवारुण्यां २५ ज्योतिष्मत्याम् २६ गोरक्षदुग्धायाम् २७ अतिविषायां २८ रक्तत्रिवृति २९ दूर्वायाम् ३०आमलक्यां ३१ हरीतक्यां ३२ तुलस्यां ३३ पिप्पल्यां ३४ स्थूलमांसहरीतक्याञ्च स्त्री। एतासां यथायथं रोगनिवारकत्वेन तथात्वम्। अमृतेन सहोत्पन्नत्वात् अमृततुल्यास्वादवत्त्वाच्च ३५ सुरायां स्त्री। ३६सूर्य्यरश्मिभेदे स्त्री "तासां शतानि चत्वारि रश्मीनां वृष्टिसर्ज्जने। शतत्रयं हिमोत्सर्गे तावद्घर्मस्य सर्ज्जने। आनन्दाश्च हि मेध्याश्च भूतनाः पूतना इति। चतुःशतं वृष्टिवाहाः सर्व्वास्ता अमृता स्त्रियः" मल्लि० यादवः। तासाञ्चामृतस्य जलस्य दायित्वात्तथा। "सौरीभिरिव नाड़ीभिरमृताख्याभिरम्मयः" रघुः। ३७मरणशून्ये विष्णौ पु० 'अमृतः शाश्वतः स्थाणुः" वि० स०। नास्ति मृतं मरणं यस्मात्। ३८ अजरमरत्वप्रदे त्रि०। "इन्द्रियस्येन्द्रियमिदं पयोऽमृतं मधु" यजु० १९,७२,७३,७४,७५। "अमृतमजरामृत्युप्रदत्वात् आनन्दकरम् अमृततुल्यम् वे०दी०। "नन्दा भौमार्कयोर्भद्रा शुक्रेन्द्वोश्च जया बुधे। शुभयोगा गुरौ रिक्ता पूर्णा मन्देऽमृताह्वया। "आदित्यभौमयोर्नन्दा भद्रा शुक्रशशाङ्कयोः जया च स्याद् गुरौ रिक्ता पूर्णार्कौ चामृता शुभेति" इति ज्योतिषोक्ते ३९ तिथिवारयोगरूपे योगभेदे "मृदुगुरुकरमूला पौष्णभान्यर्कशारे हरियुगविधियुग्मे फल्गुनीभाद्रयुग्मे। दिवसकरतरङ्गौ शर्वरीनाथवारे। गुरुयुगनलवातोपान्त्यपौष्णानि कौजे। दहनविधिशताख्यामैत्रभं सौम्यवारे। मरुदितिभपुष्या मैत्रभं जीववारे। भगयुगजयुगस्वोविष्णुमैत्रे सिताह्ने। श्रवनकमलयोनी सौरिवारेऽमृतानि" राज मा० उक्ते आदित्यहस्ता गुरुपुष्ययुक्ता बुधानुराधा शनिरोहिणी च। सोमे च विष्णुः कुजरेवती च शुक्राश्विनी चामृतयोगवर्गाः। उक्ते च ४० वारनक्षत्रयोगजे योगभेदे "यदि विष्टिव्यतीपातौ दिनवाप्यशुभं भवेत्। हन्यतेऽमृतयोगेन भास्करेण तमो यथा" ज्योति०। ४१ब्रह्मणि न०।

**अमृतगति** स्त्री यदि दशमं गुरु विहितं विशिखमितं सुकविहितम्। अमृतगतिः फणिकथिता दलयतिका नृप! कथिता" इत्युक्तलक्षण छन्दोभेदे।

**अमृतगर्भ** पु० अमृतं ब्रह्म गर्भेऽभ्यन्तरे यस्य। १ जीवे तस्य ब्रह्मात्मकत्वात् ब्रह्मणा चान्तर्यामितया तदन्तःस्थितत्वात् तथात्वम्। "यो न जीवोऽसि न मृतो देवानाममृतगर्भोऽसि स्वप्न" अथ० ६,४६,१ "स्वप्नन् स्वेन तदा सम्पन्नो भवतीति" श्रुतेः सुषुप्त्यवस्थायां सकलानर्थानवभासनेन तच्छून्यतया जीवस्य ब्रह्मरूपापत्त्या तथात्वम् अधिकं सुषुप्तिशब्दे दृश्यम् अमृतस्य मोक्षस्य गर्भ आधारः।२ब्रह्मणि

**अमृतजटा** स्त्री अमृतमिव स्वादु जटा यस्याः। जटामांस्याम्

**अमृतत्व** न० अमृतस्यामरणस्य भावः त्व। १मोक्षे। "त्यागेनैके अमृतत्वमानशुः" श्रुतिः "कश्चिद्धीरः प्रत्यगात्मानमैक्षदावृत्तचक्षुरमृतत्वमिच्छन्" क०उ०। "अमृतत्वममरणधर्म्मत्वम् भा० 'अहिंसया च भूतानाममृतत्वाय कल्पते" इति मनुः "आभूतसंप्लवस्थानममृतत्वं हि भाष्यते" इति विष्णु०पु० उक्ते २महाकल्पावस्थायित्वे च।

**अमृततरङ्गिणी** स्त्री अमृतस्य सुधाया तुषारस्य तरङ्गिणी नदीव। ज्योत्स्नायाम् राज०नि०।

**अमृततिलका** स्त्री नगणपयोधररुचिरा कुसुमविराजितसु-